# ব্যাখ্যা

(১) যৌবনারম্ভে চ প্রায়ঃ ....... মৃগতৃষ্ণিকা।

মহাকবিবাণভট্টবিরচিতায়াঃ কাদম্বরীতি কথায়াঃ শুকনাসোদেশাদ্ গৃহীতোঽয়মংশঃ। চন্দ্রাপীড়ং প্রতি শুকনাসস্যোক্তিরিয়ম্। যৌবরাজ্যাভিষেকাৎ প্রাক্ উজ্জায়িনীসম্রাজঃ তারাপীড়স্য পুত্রং চন্দ্রাপীড়ং বিনীতমপি বিনীততরং চিকীর্ষুঃ যৌবনকালদোষং নির্দিশতি শুকনাসঃ। যৌবনারম্ভে তারুণ্যপ্রারম্ভে প্রায়ঃ অধিক্যেন বুদ্ধিঃ যূনাং বোধ ইতি শাস্ত্রজলপ্রক্ষালনেন, শাস্ত্রমেব জলং তেন প্রক্ষালনেন বিবিধ-শাস্ত্রজ্ঞানেন বিশুদ্ধা অপি কালুষ্যম্ সমলত্বম্ উপযাতি প্রাপ্নোতি। যূনাং তরুণানাম্ অনুজ্ঝিতা অপরিত্যক্তা ধবলতা শ্বেততা যয়া সা তাদৃশী, তেষাং দৃষ্টিঃ সরাগা সানুরাগা ভবতি। যৌবনসময়ে সমুদ্ভূতা সমুৎপন্না রজসা রজোগুণেন ভ্রান্তিঃ ভ্রমঃ ঘূর্ণনমিতি যাবৎ যথা সা তাদৃশী। বাত্যা সবেগবায়ুঃ শুষ্কপত্রমিব পুরুষম্ আত্মেচ্ছয়া স্বেচ্ছয়া নির্বাধমিত্যর্থঃ। অতিদূরম্ অতিবিপ্রকৃষ্টং দেশম্ অপহরতি নয়তি। ইয়ম্ উপভোগরূপা মৃগতৃষ্ণিকা স্ত্রীসম্ভোগাদিমরীচিকা অতিদুরন্তা অত্যন্তং দুর্নিবারা। ইন্দ্রিয়াণি করণান্যেব হরিণান্ হরতীতি তাদৃশী।

যৌবনসময়ে যূনাং বুদ্ধিঃ কলুষীভবতি। তদা বিষয়ভোগবাসনা বর্ধতে। যথা মরুপ্রদেশে মরীচিকা পিপাসুমাকৃষ্য বিনাশয়তি, তথা কামিন্যাদিমরীচিকা যূনঃ আকৃষ্য মারয়তি। এবং সত্যপি যৌবনসময়ে বাসনা ন নিবৃত্তা ভবতি। বিরোধা-ভাসাদ্যলংকারাঃ।

(২) গুরূপদেশশ্চ নাম ................................ প্রজাগরঃ।

মহাকবি বাণভট্টপ্রণীতায়াঃ কাদম্বর্য্যাঃ শুকনাসোপদেশাদুদ্ধৃতোঽয়মংশঃ।

উজ্জয়িনীরাজস্য তারাপীড়স্য মন্ত্রী শুকনাসঃ রাজপুত্রং চন্দ্রাপীড়ম্ এবং ব্রবীতি। যৌবরাজ্যাভিষেকাৎ প্রাক্ আগতং চন্দ্রাপীড়ং বিনীতমপি বিনীততরং কর্তুমুপদিশতি শুকনাসঃ। গুরূপদেশশ্চেত্যাদিনা স্ববাক্যে শ্রদ্ধা যথা জায়তে তথৈব কর্তুময়মুপদেশঃ। গুরূপদেশঃ গুরুজনৈঃ উক্তঃ হিতোপদেশঃ পুরুষাণাং জনানাম্ স্নানং মালিন্যাপহারকম্। জলেন স্নানং প্রসিদ্ধম্। ইদং তু অজলস্নানম্ অখিলানাং



Scanned by CamScanner

সমস্তানাং মলানাং দোষাণাং প্রক্ষালনক্ষমং দূরীকরণায় অলম্। ন উপজাতম্ উৎপন্নং পলিতাদি বৈরূপ্যং বিকৃতির্যস্মিন্ তৎ, তথা ন বিদ্যতে জরা জীর্ণত্বং যত্র তত্তাদৃশম্, বৃদ্ধত্বং স্থবিরত্বম্। ন আরোপিতঃ উৎপাদিতঃ মেদোদোষঃ স্থূলতাবৃদ্ধিঃ যেন তৎ তাদৃশম্, গুরুকরণং গৌরবহেতুস্বরূপঃ। ন সুবর্ণেন স্বর্ণেন বিরচনা নির্মাণং যস্য তৎ, অগ্রাম্যং গ্রাম্যত্বদোষশূন্যং ভণ্ডাদিবাক্যাদিরিক্তভূতম্ অতি রমণীয়মিত্যর্থঃ। কর্ণাভরণং কর্ণালঙ্কারস্বরূপঃ অতীতজ্যোতিঃ তেজঃশূন্যঃ আলোকঃ প্রকাশস্বরূপঃ পরীক্ষার্থমালোকবদিতি ভাবঃ। নোদ্বেগকরঃ অবসাদ লেশোৎপাদক ইত্যর্থঃ। প্রজাগরঃ জাগরস্বরূপঃ।

গুরূপদেশেন মনসঃ মালিন্যং দূরীভবতি, কিন্তু ন জলেন। অতঃ অজলস্নানমিতি কথ্যতে। গুরুবচনাৎ যৎ বৃদ্ধত্বং তদেব শ্লাঘ্যম্। উক্তঞ্চ মনুনা—'ন তেন বৃদ্ধো ভবতি যেনাস্য পলিতং শিরঃ। যো বৈ যুবাপ্যধীয়ানস্তং দেবাঃ স্থবিরং বিদুঃ।' ইতি।

এতৎ গুরুবচনং মেদোবর্জিতং স্থূলতাকারকম্, কর্ণভূষণম্, আলোকস্বরূপঃ, সর্ববিষয়েষু সাবধানোৎপাদনাৎ জাগরস্বরূপঃ। কিন্তু স জাগরঃ ন ক্লেশকারকঃ। অত্র অধিকারূঢ়বৈশিষ্ট্যরূপমলঙ্কারঃ।

(৩) কেবলঞ্চ নিসর্গত ........... তমো যৌবনপ্রভবম্।

কবীশ্বরভট্টবাণকৃতায়াঃ কাদম্বরীতি কথায়াঃ শুকনাসোপদেশাদ্ গৃহীতোঽয়মংশঃ। যৌবরাজ্যাভিষেকাৎ প্রাক্ কদাচিদ্ উজ্জয়িনীরাজতারাপীড়সুনূশ্চন্দ্রাপীড়ঃ মহামাত্যং শুকনাসং নিকষা আগচ্ছতি। বিনীতমপি তং রাজপুত্রং বিনীততরং চিকীর্ষুঃ যৌবনসময়াগতমজ্ঞানত্ববিষয়মুপদিশতি--কেবলঞ্চেত্যাদিনা।

নিসর্গতঃ স্বভাবত এব কেবলং যৌবনাৎ তারুণ্যাৎ প্রভবতীতি জায়ত ইতি যৌবনপ্রভবম্, তমঃ তমোগুণোৎপন্নমজ্ঞানমেব তমোঽন্ধকারঃ অতিদুর্দমনীয় ইত্যাশয়ঃ। অভানুভেদ্যম্ ন ভানুনা সূর্যেণ ভেদ্যমুচ্ছেদ্যম্। ন রত্নানাং মণীনাম্ আলোকেন প্রভয়া ছেদ্যং বিনাশয়িতুং শক্যম্। তথা ন প্রদীপপ্রভয়া প্রদীপালোকেন অপনেয়ং দূরীকর্তুং শক্যম্, অতএব অতিগহনম্ অতিদুর্দ্ধর্ষং ভবতীতি। অপরান্ধকারস্য তু সূর্য্যাদিভেদ্যত্বাদনেন সহেত্যাশয়ঃ। কাব্যাদর্শে চ—

"অরত্নলোকসংহার্যমহার্যং সূর্যরশ্মিভিঃ।
দৃষ্টিরোধকরং যূনাং যৌবনপ্রভবং তমঃ।।" ইতি

প্রকৃত্যা যুবানশ্চঞ্চলা ভবন্তি। জ্ঞানবন্তোঽপি তে তারুণ্যজং স্বভাবং ন

ত্যক্তুমর্হন্তি। স্রক্‌চন্দনবনিতাদিবিষয়বিষসম্ভোগেষু তে ধাবন্তি। এবং যৌবনসময়ে তমোগুণোৎপন্নম্ অজ্ঞানমেব তে প্রবিশন্তি। তদজ্ঞানালোকং গুরূপদেশং বিনা কোঽপি ন দূরীকর্তুং শক্নোতীতি চিন্তনীয়ম্।

অত্রাতিশয়োক্তিরলংকারঃ, কাব্যলিঙ্গঞ্চ, দ্বয়োরঙ্গাঙ্গিভাবেন সঙ্করঃ।

(৪) লব্ধাপি খলু ................. বিধৃতাপ্যপক্রামতি।

চন্দ্রাপীড়স্য যৌবরাজ্যাভিষেকাৎ প্রাক্ সচিববৃদ্ধঃ শুকনাসস্তমুপদিশতি। রাজলক্ষ্মীং প্রাপ্য রাজানঃ ব্যাকুলাঃ সন্তঃ অনর্থমেব আপ্নুবন্তীতি লক্ষ্মীচরিত্রং বর্ণয়ন্নাহ শুকনাসঃ, লব্ধাপীতি।

ইয়ং লক্ষ্মীঃ, লব্ধাপি মহতা কষ্টেন প্রাপ্তাপি দুঃখেন খলু নিশ্চয়েন পরিপাল্যতে পরিপালনবিষয়ীক্রিয়তে। দৃঢ়াঃ গুণাঃ সন্ধিবিগ্রহাদয় এব পাশো রজ্জুঃ তেন যৎ সন্দানং বন্ধনং তেন নিস্পন্দীকৃতাপি নিশ্চলীকৃতাপি লক্ষ্মীঃ, নশ্যতি বিনশ্যতি পরপক্ষমবলম্বত ইত্যর্থঃ ; পাশবদ্ধাঃ গোমহিষাদয়ঃ নৈবমিতি ভাবঃ। উদ্দাম উৎকটো দর্পোঽহঙ্কারো যেষামেবংভূতা যে ভটসহস্রেণ যোদ্ধৃবৃন্দেন উল্লাসিতা উত্তোলিতা অসিলতা তরবারয় এব পঞ্জরং পক্ষ্যাদি বন্ধনগৃহং তত্র বিধৃতাপি আবদ্ধাপি লক্ষ্মীঃ অপক্রামতি অপসরতি পক্ষান্তরং যাতীত্যর্থঃ। পঞ্জরবদ্ধা সিংহাদয়ঃ নৈবমিতি ভাবঃ।

অনার্যেয়ং রাজলক্ষ্মীঃ। যদ্যপি সা প্রাপ্যতে, তথাপি অত্যন্তক্লেশেন রক্ষ্যতে পাল্যতে বা সন্ধিবিগ্রহযানাসনদ্বৈধীভাবসংশ্রয়াণাং ষড়্গুণানাং বন্ধনেন নিশ্চলীকৃতাপি সা নীচস্বভাবা অন্তর্হিতা ভবতি। সহস্রসংখ্যৈঃ সৈনিকৈঃ রক্ষিতেঽপি রাজ্যে তং রাজ্যং পরিত্যজ্য অনায়াসেনৈব সা পক্ষান্তরমবলম্বতে। বন্ধনেষু বদ্ধাঃ গোমহিষাদয়ঃ পিঞ্জরাবদ্ধাঃ সিংহাদয়শ্চ পশুত্বসত্ত্বেঽপি নৈবং কুর্বন্তি। এতেন অস্যাঃ লক্ষ্ম্যাঃ পশূনামপি অধমত্বং ব্যজ্যতে।

বিরোধাভাসনিরঙ্গকেবলরূপকয়োঃ সঙ্কর ইতি কেচিৎ বদন্তি। কেষাঞ্চিন্মতে তু বিভাবনাবিশেষোক্ত্যাঃ সন্দেহাৎ সন্দেহসঙ্করালঙ্কারো নিরঙ্গকেবলরূপকেণ সঙ্কীর্য্যতে ইতি।

(৫) শৃণ্বন্তোঽপি ...................... রাজ্যবিষবিকারতন্দ্রীপ্রদা রাজলক্ষ্মীঃ।

চন্দ্রাপীড়ং প্রতি শুকনাসস্যায়মুপদেশঃ। যৌবনমত্ততয়া ধনমদেন চ রাজানঃ প্রায়েণ উপদেশং নাকর্ণয়ন্তি। শৃণ্বন্তোঽপীতি ইত্যাদিনা রাজ্ঞাং বিবেকহীনত্বং তথা

Scanned by CamScanner

গুরূপদেশং প্রতি অবধীরণমুক্তম্। শৃণ্বন্তোঽপি আকর্ণয়ন্তোঽপি গজবন্নিমীলিতেন স্তিমিতলোচনেন অবধীরয়ন্তঃ উপদেশমবজানন্তঃ হিতোপদেশদায়িনঃ শিক্ষাকথকান্ গুরূন্ খেদয়ন্তি ক্লেশয়ন্তি সযত্নোপদেশস্যাবজ্ঞানাদিত্যাশয়ঃ। অত্র লুপ্তোপমা।

হি যস্মাৎ রাজপ্রকৃতিঃ নৃপতীনাং স্বভাবঃ অহঙ্কারঃ অভিমান এব দাহজ্বরঃ তীব্রতাপঃ তেন যা মূর্চ্ছা মোহঃ তয়া অন্ধকারিতা সমুৎপন্নান্ধকারাসদসদ্বিচাররহিতা ইত্যর্থঃ, অতএব বিহ্বলা ব্যাকুলা, বিশেষতশ্চ ধনানি সম্পত্তয়ঃ অলীকাভিমানেন মিথ্যাগর্বেণ উন্মাদকারীণি মত্ততাজনকানি, অন্যতশ্চ রাজলক্ষ্মীঃ রাজ্যশ্রীঃ, রাজ্যম্ অধিপত্যমেব বিষং তেন যো বিকারঃ, তেন তন্দ্রীং তন্দ্রাম্ আলস্যং প্রদদাতীতি সা তাদৃশী। অত্র নিরঙ্গকেবলরূপকালংকারঃ।

গজো যথা নয়নে নিমীল্য অনর্থং নিবারয়িতুং চেষ্টতে, পরন্তু তন্ন ভবতি। রাজা অপি গজনিমীলনবৎ গুরূপদেশং শৃণোতি। দর্পবশাদেব তে ব্যাকুলা ভবন্তি, লক্ষ্মীমদেন বিকৃতচিত্তাঃ রাজানঃ বিবেকহীনাঃ সন্তঃ গুরূপদেশং ন ভজন্তে।

**(৬) গঙ্গেব বসুজনন্যপি ....... স্বল্পসত্ত্বমুন্মত্তীকরোতি।**

বাণভট্টবিরচিতায়াঃ কাদম্বরীতি কথায়াঃ শুকনাসোপদেশাদুদ্ধৃতোঽয়মংশঃ।

যৌবরাজ্যাভিষেকাৎ প্রাক্ সচিববৃদ্ধং শুকনাসং নিকষা আগতশ্চন্দ্রাপীড়ঃ। যৌবনপ্রভবং মদং বর্ণয়ন্ পশ্চাৎ রাজলক্ষ্মীস্বরূপং বর্ণয়তি অমাত্যবরঃ।

গঙ্গেব ইত্যাদিনা লক্ষ্মীস্বরূপং বিবৃতম্। গঙ্গেব ভাগিরথীব লক্ষ্মীঃ, বসূনাং ধনানাম্ অষ্টবসূনামদেবানাং বা জনন্যপি জনয়িত্রী অপি তরঙ্গবুদ্বুদচঞ্চলা ভঙ্গস্থাসকৈঃ চঞ্চলা। দিবসকরঃ সূর্যঃ তস্য গতির্গমনমিব, প্রকটিতা আবিষ্কৃতা বিবিধেষু জনেষু সংক্রান্তিঃ সঞ্চরো যস্য সা তাদৃশী, পক্ষে প্রকটিতা বিবিধা মহাবিষুবাদিদ্বাদশসংক্রান্তয়ঃ রাশ্যন্তরসংক্রমণানি যয়া সা তাদৃশী। পাতালগুহেব তমঃ তমোগুণোৎপন্নম্ অজ্ঞানম্ অন্ধকারশ্চ বহুলঃ অধিকো যস্যাং সা তাদৃশী। হিড়িম্বা ঘটোৎকচজননী রাক্ষসী সেব লক্ষ্মীঃ ভীমসাহসৈকেন ভয়ঙ্করহঠকারিতয়া হার্যং হর্তুং শক্যং হৃদয়ং মনো যস্যাঃ সা। পক্ষে ভীমো বৃকোদরঃ তস্য সাহসৈকেন হিড়িম্ববধাদিসাহসকর্মণা হার্যং হৃদয়ং যস্যাঃ সা তদৃশী। প্রাবৃট্ বর্ষাকাল ইব অচিরদ্যুতিকারিণী স্বল্পকালপ্রভা-প্রকাশকারিণী। দুষ্টা দুষিতান্তঃকরণা পিশাচী রাক্ষসীব দর্শিতঃ অনেকপুরুষাণাম্ উচ্ছ্রায়ঃ অভ্যুদয়ঃ যয়া সা তাদৃশী সতী, স্বল্পসত্ত্বম্ অল্পবুদ্ধিজনম্ উন্মত্তীকরোতি তদভ্যুদয়প্রদর্শনেন উল্বণং বিদধাতি, পক্ষে—দর্শিতঃ অনেকপুরুষাণাম্ উচ্ছ্রায়



Scanned by CamScanner

উন্নততা যয়া সা অতীবদীর্ঘেত্যর্থঃ তাদৃশী সতী অল্পসত্ত্বং দুর্বলং নরমুন্মত্তীকরোতি ত্রাসেন ইতি ভাবঃ। দুষ্টপিশাচীব ইত্যাদৌ পূর্ণোপমা।

(৭) উষ্ণীষপট্টবন্ধেনেবাবচ্ছাদ্যতে ............. সত্যবাদিতা। (Hons. '90)

তারাপীড়সচিবস্য শুকনাসস্যোক্তিরিয়ম্। যৌবরাজ্যভিষেকাৎ প্রাক্ উপদেশং গ্রহীতুমাগতং চন্দ্রাপীড়ং যৌবনমদবিষয়ম্ তথা রাজলক্ষ্মীচরিত্রমুপদিশতি শুকনাসঃ। লক্ষ্ম্যা অনুগৃহীতঃ রাজা স্বভাবতয়া অবিনয়ী ভবতীতি 'উষ্ণীষপট্ট' ইত্যাদিনা ব্যাখ্যায়তে।

উষ্ণীষ মূর্দ্ধবেষ্টনং স এব পট্টবন্ধস্তেনেব জরাগমনস্মরণং 'বার্দ্ধক্যং মে ভবিষ্যতীতি চিন্তা অবচ্ছাদ্যতে পরলোকদর্শনং জন্মান্তরদৃষ্টিঃ অপবার্যতে অন্যপুরুষাবলোকনবৎ নিবার্যতে। চামরপবনৈঃ ব্যজনবায়ুনা সত্যবাদিতা অপহ্রীয়তে ধূলিবৎ দূরীক্রিয়তে, প্রায়েণ মিথ্যাবাদিত্বাৎ।

নৃপতীনামভিষেকসময়ে এব লক্ষ্ম্যালিঙ্গিতাঃ রাজানঃ ব্যাকুলাঃ সন্তঃ অবিনয়মাচরন্তি। মস্তকে শুভ্রকেশাঃ বার্ধক্যস্য চিহ্নম্। কিন্তু উষ্ণীষবন্ধনেন তদ্দূরীকরোতি নরপতিঃ। যদ্যপি এতন্ন সত্যম্। অপি তু ছত্রমণ্ডলেন আত্মানমাচ্ছাদ্য জন্মান্তরদৃষ্টিমাচ্ছাদয়তি। নিরন্তরব্যজনবায়ুনা সত্যমপহরন্তি রাজানঃ। এতেন তেষাং যশো লুপ্যতে। অত্র ক্রিয়োৎপ্রেক্ষালঙ্কারঃ।

(৮) ত্বগন্তরিত ........ স্থাপয়ন্তি। (Hons. '91)

ধূর্ত্তাঃ রাজসেবকাঃ রাজানং বঞ্চয়ন্তি। তে প্রতারণানিপুণাঃ দোষান্ অপি গুণপক্ষমারোপ্য রাজানং দাম্ভিকং দেবং কারয়ন্তি। এতেন রাজা দেবতানুরূপাং চেষ্টাং কুরুতে। ত্বগিত্যাদিনা এতাদৃশং মিথ্যামাহাত্ম্যযুক্তং রাজানং বর্ণয়তি মহামন্ত্রী শুকনাসঃ।

স্বললাটং ত্বচা চর্মণা অন্তরিতম্ আচ্ছাদিতং তৃতীয়ং বিষমং লোচনং যত্র তাদৃশম্ আশঙ্কন্তে মন্যন্তে। অনেন আত্মনঃ শিবত্বং ধ্বন্যতে। দর্শনপ্রদানং লোকানাং স্বাত্মপ্রকটনম্ অনুগ্রহং প্রসাদং গণয়ন্তি মন্যন্তে। দৃষ্টিপাতমপি অবলোকনমপি উপকারপক্ষে উপকৃতিপক্ষে স্থাপয়ন্তি নিক্ষিপন্তি।

যথা মহাদেবস্ত্রিনয়ন স্তথা রাজা অপি, কিন্তু তৃতীয়নয়নং তু চর্মণা আচ্ছাদিতমিতি স মন্যতে। রাজভৃত্যানাং মিথ্যাস্তুতিনা এবং ঘটতে। দেবদর্শনং দেবানুগ্রহেণ এব সম্ভবতি। তথা অপরস্মৈ দর্শনপ্রদানম্ অনুগ্রহমেব গণয়তি রাজা। কস্যোপরি দৃষ্টিপ্রদানমপি অনুগ্রহমিতি মন্যতে সঃ।

Scanned by CamScanner

(৯) মিথ্যামাহাত্ম্যগর্বনির্ভরাশ্চ .......... গুরূন্। (Hons. '89)

ভট্টবাণকৃতায়াঃ কাদম্বরীকথায়াঃ শুকনাসোপদেশাৎ গৃহীতোঽয়মংশঃ।

প্রতারণানিপুণৈঃ ধূর্তৈঃ রাজানঃ মিথ্যাস্তুতিভিঃ প্রতার্যন্তে। এতেন তে আত্মানং দিব্যোচিতং কৃত্বা স্বপক্ষে দেবভাবমারোপয়ন্তঃ সর্বেষামুপহাস্যতামুপযান্তি। 'মিথ্যামাহাত্ম্য' ইত্যাদিনা তেষামাচরণমত্র বর্ণিতম্।

মিথ্যামাহাত্ম্যেন অলীকাত্মমহিম্না যো গর্বোঽভিমানঃ তেন নির্ভরাঃ পরিপূর্ণাঃ দেবতাভ্যঃ ন প্রণমন্তি নমস্কারং ন কুর্বন্তি। দ্বিজাতীন্ ব্রাহ্মণান্ ন পূজয়ন্তি নার্চয়ন্তি। মান্যান্ মাননীয়ান্ শ্বশুরাদীন্ ন মানয়ন্তি সম্মানং ন কুর্বন্তি। অর্চনীয়ান্ পূজ্যান্ উপাধ্যায়াদীন্ নার্চয়ন্তি ন পূজয়ন্তি। অভিবাদনার্হান্ প্রণম্যান্ পুরোহিতাদীন্ ন অভিবাদয়ন্তি ন প্রণমন্তি। গুরূন্ হিতাহিতপ্রাপ্তিপরিহারোপদেষ্টৄন্ ন অভ্যুত্তিষ্ঠন্তি লক্ষীকৃত্য গাত্রোত্থানং ন কুর্বন্তি।

আত্মানং দেবভাবং প্রদর্শ্য মিথ্যামাহাত্ম্যগর্বেণ পূর্ণাঃ রাজানঃ দেবান্ অপি ন প্রণমন্তি। মাননীয়ান্ ব্রাহ্মণান্ পূজ্যান্ আত্মীয়ান্ অপি ন নমস্যন্তি। বয়োবৃদ্ধান্ গুরূন্ দৃষ্ট্বা আসনাদুত্থায় তান্ ন অভিবাদয়ন্তি ইতি দম্ভমানমদাহিতানাং রাজ্ঞাম্ আচরণং বিবৃতম্।

(১০) সর্বথা তমভিনন্দন্তি ...... স্তৌতি। (Hons. '96)

মিথ্যাদেবভাবং স্বপক্ষমারোপয়তঃ রাজ্ঞশ্চরিত্রমত্র বিবৃতম্।

যঃ দিবারাত্রং কৃতাঞ্জলিঃ অধিদৈবতমিব নৃপান্ স্তৌতি, 'সর্বথা' সর্বপ্রকারেণ নৃপঃ তং জনমেব অভিনন্দতি, প্রশংসন্তি। তম্ আলপন্তি আলাপং কুর্বন্তি। তং পার্শ্বে সমীপে কুর্বন্তি রক্ষন্তীত্যর্থঃ। তং সম্বর্দ্ধয়ন্তি নানাসাহায্যেন উন্নময়ন্তি। তেন পুরুষেণ সহ সুখম্ অবতিষ্ঠন্তে সুখেন কালং নয়ন্তি। তস্মৈ স্তুতিকারায় দদতি প্রযচ্ছন্তি। তং পুরুষং প্রতি মিত্রতাম্ উপনয়ন্তি তং সুহৃদং কুর্বন্তীত্যর্থঃ। তস্য ধূর্তস্য বচনমেব শৃণ্বন্তি, নান্যস্য। তত্র বর্ষন্তি ধনং বিতরন্তি ইতি। তং পুরুষং বহুমন্যন্তে অধিকম্ আদ্রিয়ন্তে। তমাপ্ততাং বিশ্বস্ততাম্ আপাদয়ন্তি প্রতিপাদয়ন্তি। যো জনঃ অহর্নিশং দিবারাত্রম্ অনবরতম্ নিরন্তরম্ উপরচিতাঞ্জলিঃ বদ্ধাঞ্জলিঃ অধিদৈবতমিব আরাধ্যদেবমিব বিগতান্যকর্তব্যঃ দূরীভূতমনাং কর্তব্যং যস্য স তথোক্তঃ সন্, স্তৌতি স্তুতিং করোতি।

রাজানঃ স্বেষু মিথ্যা দেবত্বমারোপ্য ধূর্তং মিথ্যাবাদিনঞ্চ স্তোতারমেব অহর্নিশং

পার্শ্বে কৃত্বা তেনৈব সহ বার্ত্তালাপং কুর্বাণাঃ সুখেন কালং নয়ন্তি। তেনৈব জনেন সহ প্রচলন্তি, তমেব প্রশংসন্তি, তস্মৈ এব প্রভূতং দদতি। এবম্ আত্মবিস্মৃতা মিথ্যামাহাত্ম্যগর্বনির্ভরাঃ রাজানঃ বিপথগামিনঃ ভবন্তি।

(১১) অয়মেব চানাস্বাদিতবিষয়রসস্য ....... গলত্যুপদিষ্টম্।

উজ্জয়িনীরাজপুত্রং চন্দ্রাপীড়ং প্রতি সচিববৃদ্ধস্য শুকনাসস্য উপদেশোঽয়ম্।

অন্তরিন্দ্রিয়নিগ্রহার্থং গুরোরুপদেশকাল এব যৌবনসময়ঃ। হিতপ্রাপ্ত্যর্থমহিত-পরিহারার্থঞ্চ গুরুবচনং কল্যাণকরমেব। অতঃ যাবৎ কামিনীকাঞ্চনাদিবিষয়ঃ নানুভূত-স্তাবৎ তস্মিন্ চন্দ্রাপীড়ে উপদেশপ্রদানং শক্যতে ইতি 'অয়ম্' ইত্যাদিনা কথ্যতে।

অনাস্বাদিতঃ ন আস্বাদিতঃ বিষয়রসঃ কামিনীকাঞ্চনাদিভোগ্যবিষয়ঃ যেন তস্য তাদৃশস্য তব চন্দ্রাপীড়স্য ইতি। অয়মেব উপদেশস্য শিক্ষায়াঃ কালঃ সময়ঃ। হি যস্মাৎ কুসুমশরস্য কামদেবস্য শরপ্রহারেণ বাণাঘাতেন জর্জরিতে উপপ্লুতে অনেকশো বিবরীকৃতে চ হৃদয়ে চেতসি জলমিব উপদিষ্টং গুরূপদেশঃ গলতি ক্ষরতি।

যৌবনারম্ভে মনুষ্যস্য সারল্যং বিদ্যতে। অয়মেব উচিতকালঃ গুরূপদেশমাকর্ণ্য আত্মানং শোধয়িতুম্। কামজর্জরিতং হৃদয়মপি গুরুবচনাৎ স্থিরীভবতি। অতঃ প্রাপ্তযৌবনঃ চন্দ্রাপীড়োঽপি যৌবনদোষং দূরীকরণার্থং শুকনাসস্য উপদেশং শৃণুয়াদিতি ভাবঃ। অত্রোপমালংকারঃ।

(১২) বিদ্বাংসমপি ....... খলীকরোতি লক্ষ্মীরিতি।

কাদম্বরীতি কথায়াঃ শুকনাসোপদেশাদুদ্ধৃতোঽয়মংশঃ। আদৌ চন্দ্রাপীড়ং যৌবনপ্রভবং দোষং লক্ষ্মীচরিত্রঞ্চ উপবর্ণ্য অন্তিমে তস্যাঃ লক্ষ্ম্যাঃ দুর্বিনীতত্বং বিজ্ঞাপয়তি।

বিদ্বাংসমপি পণ্ডিতমপি সচেতনমপি জ্ঞানবন্তমপি সদসদ্বিবেকশালিনমপি, মহাসত্ত্বমপি অতীববলবন্তমপি অভিজাতং সদ্বংশজাতমপি ধীরমপি ধৈর্য্যশীলমপি প্রযত্নবন্তমপি উদ্যোগযুক্তমপি পুরুষং জনং দুর্বিনীতা দুশ্চরিত্রা ইয়ং লক্ষ্মীঃ শ্রীঃ খলীকরোতি সজ্জনসংসর্গাৎ স্খলনং প্রাপয়তি।

রাজলক্ষ্মীঃ রাজানং প্রাপ্য তং বিমার্গগামিনং করোতি। ইয়ং লক্ষ্মীঃ দুর্বিনীতা। আরাধিতাপি সা বিপরীতং করোতি। ন কেবলং রাজানং যুবানং বা অপি তু শাস্ত্রজ্ঞং বীরম্ অভিজাতমপি আক্রম্য উন্মার্গগামিনং করোতীয়ং লক্ষ্মীঃ। তস্যাঃ চরিত্রং তু সর্বথা নিন্দনীয়ম্ ইত্যাশয়ঃ।

Scanned by CamScanner